Reg. No. : ....................................

Name : ..........................................

**FY-818**

**IMPROVEMENT / SUPPLEMENTARY EXAMINATION, OCTOBER 2022**

Part – III

**SANSKRIT SAHITYA**

**(Optional)**

Maximum : 80 Scores

Time : 2½ Hours

Cool-off time : 15 Minutes

*निर्देशा :*

- 15 निमेषाः समाश्वाससमयः ।
- प्रश्नान् पठितुम् इच्छानुसारं चयितुम्, उत्तराणि क्रमीकर्तुं च अयं समयः उपयोक्तव्यः ।
- प्रश्नस्य निर्देशान् सश्रद्धं पठित्वा अवगत्य च उत्तराणि लेखनीयानि ।
- प्रश्नानाम् अङ्काः तत्र तत्र दत्ताः ।
- उत्तरलेखनाय समयः अङ्काः च परिगणनीयः ।

*നിർദ്ദേശങ്ങൾ:*

- 15 മിനിറ്റ് സമാശ്വാസ സമയമാണ്. ഈ സമയം ചോദ്യങ്ങൾ വായിക്കുന്നതിനും ഇഷ്ടമുള്ള ചോദ്യങ്ങൾ തിരഞ്ഞെടുക്കുന്നതിനും ഉത്തരങ്ങൾ ആസൂത്രണം ചെയ്യാനും ഉപയോഗിക്കാം.
- ഓരോ ചോദ്യവുമായി ബന്ധപ്പെട്ട നിർദ്ദേശങ്ങൾ ശ്രദ്ധാപൂർവ്വം വായിച്ചു മനസിലാക്കിയ ശേഷം ഉത്തരമെഴുതുക.
- ഓരോ ചോദ്യത്തിനുമുള്ള സ്കോർ അതോടൊപ്പം നൽകിയിരിക്കുന്നു. ഉത്തരമെഴുതുമ്പോൾ സമയവും സ്കോറും പരിഗണിക്കണം.

**1-10 प्रश्नेषु अष्टानाम् उत्तराणि कोष्ठकात् चित्वा लिखत । प्रत्येकं एकैक: अङ्क: ।**

**1 മുതൽ 10 വരെയുള്ള ചോദ്യങ്ങളിൽ ഏതെങ്കിലും എട്ട് എണ്ണത്തിന് ബ്രാക്കറ്റിൽ നിന്നും തെരഞ്ഞെടുത്ത് എഴുതുക. ഒരു സ്കോർ വീതം.**

1. विद्वान् कुत्र पूज्यते ?

   (एकत्र, सर्वत्र, अन्यत्र)

2. उदारचरितानां कुटुम्बकं किम् ?

   (वसुधा, अटवी, त्रिदिव:)

3. पवनसम्भव: क: ?

   (हनुमान्, दशानन:, लक्ष्मण:)

4. नारायणीयस्य कर्ता क: ?

   (मेल्पुत्तूर् नारायणभट्टपादा:, कुलशेखर:, शक्तिभद्र:)

5. महाभारतकथामवलम्बय रचितं नाटकं किम् ?

   (चारुदत्तम्, कर्णभारम्, प्रतिमानाटकम्)

6. "विना गोरसं को रस: पण्डितानाम् ।" अत्र गोरसपदस्य अर्थ: क: ?

   (वाग्विलास:, तक्रम्, नेत्रविलास:)

7. स: सरसीरुहाक्ष: असुरान् निहन्तुम् अजायत । सरसीरुहाक्ष: क: ?

   (नन्दगोव:, वसुदेव:, विष्णु:)

8. अफलस्य फलत्वेन वर्णने क: अलङ्कार: ?

   (फलोत्प्रेक्षा, वस्तूत्प्रेक्षा, हेतूत्प्रेक्षा)

9. "हंसीव कृष्ण ते कीर्तिः ।" अत्र कः अलङ्कारः ?

(उपमा, रूपकम्, उत्प्रेक्षा)

10. जतजास्ततो गौ – वृत्तं किम् ?

(उपजातिः, उपेन्द्रवज्रा, आर्या)

**11-18 प्रश्नेषु षण्णाम् उत्तराणि लिखत । प्रत्येकं द्वौ अङ्कौ ।**

**11-18 വരെയുള്ള ചോദ്യങ്ങളിൽ ഏതെങ്കിലും ആറ് എണ്ണത്തിന് ഉത്തരമെഴുതുക. രണ്ട് സ്കോർ വീതം.** **(6 × 2 = 12)**

11. उदाहरणानुसारं सन्धत्त ।

उदा – इति + एतत् → इत्येतत् ।

1. इति + एव → ______ ।

उदा – तत्र + एव → तत्रैव ।

2. न + एव → ______।

12. एकपदं लिखत ।

1. भुवः पतिः – _______ ।

2. जीवेन सह वर्तते यत् – _______ ।

13. विग्रहवाक्यं लिखत ।

1. अर्थान्तरम् – ______।

2. महायशाः – ______।

14. प्रदत्तं वाक्यं पठित्वा क्त्वान्त ल्यबन्त पदानि चित्वा लिखत ।

यावदिमां गृहीत्वा देवक्याः हस्ते निक्षिप्य दुरात्मानं कंसं वञ्चयामि ।

15. उदाहरणानुसारं पदच्छेदं लिखत ।

उदा – वृक्षश्च → वृक्षः + च ।

1. यश्च → ______ + ______ ।

उदा – तस्यानुभवः → तस्य + अनुभवः ।

2. यस्यास्ति → + ______ ।

16. कः गणे नान्तर्भवति ।

1. मुकुन्दमाला, नारायणीयम्, तपतीसंवरणम् ।
2. आश्चर्यचूडामणिः, सुभद्राधनञ्जयम्, विश्वभानुः ।

17. 'क' विभागे प्रदत्तस्य आशयस्य प्रतिपादकं श्लोकभागं 'ख' विभागात् चित्वा लिखत ।

| क | ख |
|---|---|
| 1. पण्डितः लोके सर्वत्र पूज्यते । | हुतं च दत्तं च तथैव तिष्ठति । |
| 2. यागस्य दानस्य च फलं सर्वदा तिष्ठति । | स्वदेशे पूज्यते राजा विद्वान् सर्वत्र पूज्यते । |

18. गणनाम लिखत ।

ऽ ऽ –
1. जननी – अन्त्यगुरु ______ ।

– ऽ –
2. पादयोः – मध्यलघु ______ ।

**19 - 27 प्रश्नेषु सप्तानाम् उत्तराणि लिखत । प्रत्येकं चत्वारः अङ्काः ।**

**19 മുതൽ 27 വരെയുള്ള ചോദ്യങ്ങളിൽ ഏതെങ്കിലും ഏഴെണ്ണത്തിന് ഉത്തരമെഴുതുക. നാല് സ്കോർ വീതം.** **(7 × 4 = 28)**

19. प्रादेशिकभाषया आङ्गलभाषया वा अनुवदत ।

संस्कृते बहूनि साहित्यविनोदानि सन्ति । तेषु समस्यापूरणं प्रहेलिकारचना इत्यादीनि प्रसिद्धानि । तथा एव चाटुश्लोकव्याख्यानं च । एतानि साहित्यरूपाणि मानसोल्लासदायकानि भवन्ति ।

20. श्लोकं पठित्वा गद्यक्रमं पूरयत ।

तदेषु नैकोऽपि भुवं गतो मे

शक्नोति कर्तुं प्रतिकूलभावम् ।

महीयसः किं घटते परागः

समीरणस्याभिमुखं प्रसर्तुम् ।।

तत् एषु नैकः अपि _______ गतः मे _______ कर्तुं न शक्नोति । _______ महीयसः समीरणस्य _______ प्रसर्तुं किं घटते ।

21. यथोचितं योजयत ।

| क | | ख |
|---|---|---|
| मेल्पुत्तूर् नारायणभट्टपादाः | – | सुभद्राधनञ्जयम् । |
| कुलशेखरः | – | नारायणीयम् । |
| रामपाणिवादः | – | आश्चर्यचूडामणिः । |
| शक्तिभद्रः | – | राघवीयम् । |

22. प्रदत्तेषु नाटकसङ्केतेषु द्वयो: टिप्पणीं लिखत ।

1. सूत्रधार: ।

2. प्रकाशम् ।

3. नान्दी ।

23. प्रदत्तं श्लोकं पठित्वा स्ववाक्यै: आशयं लिखत ।

अहं रामस्य सन्देशात् देवि दूतस्तवागत: ।

वैदेहि! कुशली राम: स त्वां कौशलमब्रवीत् ।।

24. रेखाङ्कितपदानां स्थाने समानार्थकपदानि पेटिकात: चित्वा खण्डिकां पुन: लिखत ।

कस्मिंश्चित् अधिष्ठाने चत्वारो <u>ब्राह्मणपुत्रा:</u> परस्परं <u>मित्रभावम्</u> उपगता: <u>वसन्ति स्म</u> । तेषां त्रय: शास्त्रपारङ्गता: परन्तु प्रायोगिक<u>बुद्धिरहिता:</u> ।

| बुद्धिशून्या:, सुहृद्भावम्, द्विजपुत्रा:, अवसन् |
|---|

25. अधोलिखिते सम्भाषणे रिक्तस्थानानि पेटिकात: उचितपदान्युपयुज्य पूरयत ।

देवकी – जयतु आर्यपुत्र !

वसुदेव: – देवकि! _____ खलु वर्तते ।

देवकी – क्व आर्यपुत्र: इमं _____ ?

वसुदेव: – _____ न जाने । अथवा यत्र दैवं विधास्यति तत्र _____ गृहीत्वा अपक्रामामि ।

| बालं, अर्धरात्रं, नेष्यति, अहमपि |
|---|

26. प्रदत्तं पद्यभागं पठित्वा सलक्षणं अलङ्कारं निर्णयत ।

"मदेन भाति कलभ: प्रतापेन महीपति:" ।

27. यथोचितं योजयत ।

| क | ख |
|---|---|
| तौ जगौ ग: | वसन्ततिलका । |
| नभौ भरौ | उपेन्द्रवज्रा । |
| जतजास्ततो गौ | इन्द्रवज्रा । |
| तभजा: जगौ ग: | द्रुतविलम्बितम् । |

**28 - 34 प्रश्नेषु चतुर्णाम् उत्तरं लिखत । एकैकस्य षड् अङ्का: ।**

**28 മുതൽ 34 വരെയുള്ള ചോദ്യങ്ങളിൽ ഏതെങ്കിലും നാല് എണ്ണത്തിന് ഉത്തരമെഴുതുക. ആറ് സ്കോർ വീതം.** **(4 × 6 = 24)**

28. अध: प्रदत्तेषु श्लोकेषु इष्टतमं श्लोकं सकारणं विशदयत ।

1. शिक्षा क्षयं गच्छति कालपर्ययात्

   सुबद्धमूला निपतन्ति पादपा: ।

   जलं जलस्थानगतं च शुष्यति

   हुतं च दत्तं च तथैव तिष्ठति ।।

2. पुराणमित्येव न साधु सर्वं

न चापि काव्यं नवमित्यवद्यम् ।

सन्त: परीक्ष्यान्यतरद् भजन्ते

मूढ: परप्रत्ययनेयबुद्धि: ।।

3. विद्वत्वं च नृपत्वं च नैव तुल्यं कदाचन ।

स्वदेशे पूज्यते राजा विद्वान् सर्वत्र पूज्यते ।।

29. अध: प्रदत्तं गद्यांशं पठित्वा प्रश्नानामुत्तराणि लिखत ।

श्रीमता वाल्मीकिना विरचितं 'रामायणम्' आदिकाव्यम् इति गीयते । वाल्मीकि: आदिकवि: । तमसानदीतीरे क्रौञ्चमिथुनात् एकं व्याध: अवधीत् । तदा वालमीके: मुखात् निर्गलितं श्लोकं श्रुत्वा ब्रह्मा एव रामायणकथा त्वया रचनीया इत्यादिदेश । तदनुसारं रचितं वाल्मीकिरामायणम् । तत्र वाल्मीकिरामायणे षट्काण्डानि सन्ति । दण्डकारण्ये उषितवती सीता दुरात्मना रावणेन उपहृता अभूत् ।

1. श्रीमता वाल्मीकिना विरचितम् आदिकाव्यं किम् ?
2. कस्य मुखात् निर्गलितं श्लोकं श्रुत्वा ब्रह्मा रामायणकथां रचयितुम् आदिदेश ?
3. रामायणे कति काण्डानि सन्ति ?
4. दण्डकारण्ये उषितवती का ?
5. सीता केन अपहृता अभूत् ?
6. आदिकवि: क: ?

30. कथास्तम्भान् क्रमीकुरुत ।

- मार्गमध्ये कानिचित् अस्थीनि उपश्यन् ।
- लब्धजीव: सिंह: तान् त्रीन् व्यापादितवान् ।
- कस्मिंश्चित् ग्रामे चत्वारो ब्राह्मणपुत्रा: आसन् ।
- ते कदाचित् देशान्तरं गतवन्त: ।
- तेषु एक: तस्य अस्थिसञ्चयम् अकरोत् ।
- क्रमेण द्वितीय: चर्म-मांस-रुधिरं तृतीय: जीवसञ्चालनं च अकरोत् ।

31. अध: प्रदत्तं गद्यभागं पठित्वा जीवनचरितरूपरेखां लिखत ।

केरलीयसंस्कृतकविषु प्रथितयशो भवति मेल्पुत्तूर् नारायणभट्ट: । क्रिस्तो: परं षोडशेशतके उपरिनवग्रामे (मेल्पुत्तूर्) अयं लब्धजन्माभूत् । मातृगुप्त: माधवाचार्य:, दामोदर:, अच्युतपिबारटि: इत्येते नारायणभट्टस्य गुरव: आसन् । मीमांसा, तर्कशास्त्रम्, व्याकरणशास्त्रम् इत्यादिषु अयं निष्णात: आसीत् । स: अयं सहस्राधिकै: श्लोकै: भागवतकथाम् अवलम्बय 'नारायणीयम्' इति स्रोतकाव्यं व्यरचयत् । नारायणीयस्य् रचनया श्रीनारायणभट्टपाद: वातरोगात् विमुक्त: इति ऐतिहयम् अपि विद्यते । श्रीपादसपीति: गुरुवायुपुरेशस्तव: च तस्य अन्यत् स्तोत्रकाव्यद्वयम् । धातुकाव्यं, मानमेयोदयस्य मानभाग:, प्रक्रिया-सर्वस्वम्, अपाणिनीयप्रामाण्यसाधनम्, आश्वलायनक्रियाक्रम: इत्येते नारायणभट्टस्य अन्ये ग्रन्था: भवन्ति । विंशत्यधिका: चम्पूग्रन्था: अपि तेन रचिता: ।

नाम –

जननम् –

गुरव: –

नारायणीयस्य ऐतिहयम् –

स्तोत्रकाव्यानि –

इतरग्रन्था: –

32. श्लोकं पठित्वा प्रश्नानामुत्तराणि लिखत ।

नियम्य सा मातुल इत्यमर्षं

प्रसेदुषी मामवदच्च बाला ।

अरिर्महीयानजनिष्टभूमौ

तवोचितं सम्प्रति चिन्तयेति ।।

1. श्लोके मातृसहोदर: इत्यर्थे प्रयुक्तं पदं किम् ?

2. सन्धत्त – मामवदत् + च = _______ ।

3. महीयान् अरि: अजनिष्ठ । कुत्र ?

4. श्लोकस्य आशयं स्ववाक्यै: लिखत ।

33. सूचनानुसारं पञ्चतन्त्रम् अधिकृत्य टिप्पणीं लिखत ।

**सूचना :**

बालसाहित्यम्, विष्णुशर्मा, पञ्चतन्त्राणि, अनिपुणान् राजकुमारान्, राजनीतिबोधनम्, विश्वसाहित्ये प्रसिद्धम् ।

34. अध: प्रदत्तं गद्यभागं पठित्वा आशयं संगृह्य लिखत ।

चिन्तोद्दीपका: नर्मोक्तय: भवन्ति चाटुश्लोका: । चाटूक्तिर्नर्मभाषणम् इति तल्लक्षणम् । केषुचित् चाटुश्लोकेषु प्रश्नानाम् उत्तराणि तत्रैव निगीर्णानि भवन्ति । चाटुश्लोका: विनेदाय, साहित्याभिरुचिवर्धनाय चिन्तोद्दीपनाय च स्वीक्रियन्ते ।

एकस्मिन् दिने सीता श्रीरामस्य पादयो: लालनसमये अङ्गुलीयकरत्नस्थाने स्वप्रतिबिम्बं दृष्ट्वा – सपत्नीम् – अन्यां स्त्रियं मन्वाना तदङ्गुलीयकं मोचायित्वा क्षिप्तवतीति भाव: ।

अत्र अर्थान्तरं प्रतीयते यथा पुरा सीतास्वयंवरार्थं गतस्य रामस्य पादस्पर्शेनैव बहुकालात्पूर्वं शिलात्वमुन्नाया: अहल्याया: दिन्यसौन्दर्यवर स्त्रीरूपं लब्धम् ।

तत् स्मृत्वा अधुना स्वस्य अङ्गुलीरत्नं रामपादस्पर्शेन दिव्यस्त्री स्यादिति अचिन्तयत् । पुन: मम सापत्न्यदु:खं भवेदिति तदङ्गुलीयकमेव विमुच्य दूरत: क्षिप्तवतीति ।

**35-36 प्रश्नयो: एकस्य उत्तरं लिखत । अष्ट अङ्का: ।**

**35 മുതൽ 36 വരെയുള്ള ചോദ്യങ്ങളിൽ ഒരെണ്ണത്തിന് ഉത്തരമെഴുതുക. 8 സ്കോർ.**

**(1 × 8 = 8)**

35. हनुमत्सीतासंवादं सूचनानुसारं संगृह्य लिखत ।

**सूचना :**

दु:खिता सीता । हनुमत: सीतादर्शनम् । सीताया: स्वस्याअवस्थाकथनम् । हनुमता कृतं सान्त्वनम्

36. सूचनामनुसृत्य अमात्यान् प्रति कंसवचनं, तेषां प्रतिवचनं च स्ववाक्यै: संगृह्य लिखत ।

**सूचना :**

- विनीत: कंस: अवदत् ।
- भगिनीसुतानां सुताया: च वधोद्यम: ।
- दर्शितदिव्यरूपा देवी ।
- देवानां पलायनम् ।
- भोगान् भुङ्क्ष्व ।